श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीनवनीतकृष्णाष्टकं ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीनवनीतकृष्णाष्टकं ॥

मन्दस्मितं मधुरकोमललास्यलीलं
कन्दर्पकोटिकमनीयकिशोरमूर्तिम्।
कुन्दस्फुरद्दशनकं कुटिलालकान्तं
वन्देय नन्दतनयं नवनीतकृष्णम्॥ १ ॥

नाट्यावलोकनकुतूहलिभिः प्रदिष्टं
कोट्या करस्य नवनीतघनं दधानम्।
शाट्या शिशोरुचितया शबलावलग्नं
वीट्या लसन्मुखमिमो नवनीतकृष्णम्॥ २ ॥

मञ्जीरमञ्जुचरणं मृदुलाङ्गुलीकं
पुञ्जीभवन्मधुपपुष्कलपुष्पमालम्।
कञ्जीभवन्नयनमाश्रितदेहभाजां
सञ्जीवनं नम मनो नवनीतकृष्णम्॥ ३ ॥

पूरेण नीलमहसां परिपूर्णगात्रं
हारेण मौक्तिकजुषा हृतसर्वचित्तम्।
चोरेण मोहितमुनिं दधिकुण्डभाजा
पारेगिरं स्तुहि मनो नवनीतकृष्णम्॥ ४ ॥

पद्मालयाधरणिपालितपार्श्वयुग्मं
सद्मास्थितं मणिकनत्कनकावक्लृप्तम्।
छद्मादिदूरगजनैः परिचर्यमाणं
विद्मः कथं वयममुं नवनीतकृष्णम्॥ ५ ॥

ध्यातं सदा मुनिजनैरभिवृद्धहर्षैः
पूतं मुहुर्व्रजवधूजनचुम्बितैस्तैः।

क्रीतं क्षणेन शरणागतदीनवाचा
स्फीतं श्रिया भज मनो नवनीतकृष्णम्॥ ६॥

उद्यन्मृगाङ्ककमनीयमुखारविन्दं
सद्यःस्फुरत्कमलकोमललोचनान्तम्।
यद्यन्नताभिलषितं तदुपार्जयन्त-
मद्य स्मरामि सरसं नवनीतकृष्णम्॥ ७॥

तुङ्गं गुणैरनुपमैरनवद्यगन्धैः
सङ्गं श्रितेषु सततं स्वयमादधानम्।
अङ्गं वहन्तमतुलं नवमेघनीलं
त्वं गन्तुमर्हसि मनो नवनीतकृष्णम्॥ ८॥

नवनीतकृष्णविषयामवनीसुरभावुकां स्तुतिं कथयन्।
सवनी संपन्नः स्यात् स वनी स यतिः स एव मुक्तश्च॥ ९॥

॥ इति श्रीनवनीतकृष्णाष्टकं समाप्तम्॥